aglasem.com

FOR MAHARASHTRA BOARD (MSBSHSE) CLASS 12 EXAM PREPARATION

# Maharashtra Board (MSBSHSE) Class 12 2026 Question Paper · Sanskrit

EXAM
Maharashtra Board (MSBSHSE) Class 12

YEAR
2026

TYPE
Question Paper

SUBJECT
Sanskrit

Notes · Sample Papers · Previous Year Papers · Mock Tests
aglasem.com

DAY — 04 SEAT NUMBER

| 2026 | II | 13 | 1100 | J-123 | (SK) |
|---|---|---|---|---|---|

# SANSKRIT (33)

Time : 3 Hrs. (15 Pages) Max. Marks : 80

**सूचना :**

(१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
(२) यथासूचनम् आकलनकृतयः, व्याकरणकृतयः आरेखितव्याः।
(३) आकृतीनाम् आरेखनं मसिलेखन्या कर्तव्यम्।
(४) रिक्तस्थानपूरणे युज्यमानाः शब्दाः अधोरेखितव्याः।

## प्रथमः विभागः — सुगमसंस्कृतम्। [६]

**प्र. १.** (अ) चित्रं दृष्ट्वा व्यावहारिक सूचनाः संस्कृतभाषया लिखत। (३)

(१) 

(२) 

(३) 

**( ब )** व्यावहारिकशब्दमञ्जूषातः शब्दान् चित्वा उचितं स्तम्भं लिखत। ( ६ तः ६ ) ( ३ )

| शिक्षणम् | नाट्यम् | क्रीडा |
|---|---|---|
| | | |

( रङ्गसूचना, शोध-निबन्धः, भेरी, मोक्षपटः, वीणा, सूत्रधारः, विद्वत्सभा, जलतरणम् )

## द्वितीयः विभागः — पद्यम्। [ १२ ]

( अवबोधनम्, शब्दज्ञानम्, पृथक्करणम्, अन्वयपूर्तिः, सरलार्थः )

**प्र. २. ( अ )** पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। **( ४ )**

( १ ) अवबोधनम्। ( ३ तः २ ) ( २ )

(i) उचितं वाक्यं चित्वा वाक्यं पुनर्लिखत।

कविः दारिद्र्यं नमति, यतः - ..............।

( अ ) दारिद्र्यं नाम काचिद् देवता।

( ब ) दारिद्र्यात् सः सिद्धः जातः।

(ii) पूर्णवाक्येन उत्तरत।

का कौमारं वहति?

(iii) रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत।

<u>तृणात्</u> तूलः लघुः।

| 0 | 1 | 2 | 3 |
|---|---|---|---|

SEAT NUMBER | | | | | | | |

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति॥
भो दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः।
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन॥
अद्यापि दुर्निवारं स्तुतिकन्या वहति कौमारम्।
सद्भ्यो न रोचते साऽसन्तोऽप्यस्यै न रोचन्ते॥
द्वन्द्वोऽहं द्विगुरप्यहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥

(२) पृथक्करणम्। (२)

जालरेखाचित्रं पूरयत।




**(ब)** पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। **(४)**

(१) अवबोधनम्। (३ तः २) (२)

(i) चतुष्कोणं पूरयत।

कंसबन्धनगृहात् पलायितः अर्भकः ☐

(ii) पूर्णवाक्येन उत्तरत।

वीरसावरकरस्य वाहिन्याः नाम किम्?

(iii) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत।

विनायकः चिन्तयति, 'न्यायनाट्यकृतशूलरोपणं वरम्।'

वीर सावरकरस्य वाहिनी 'मोरिया' समनुदिश्य भारतम्।
प्रस्थिता विधृतसत्त्वधारिणी व्याघ्रिकेव निजगह्वरं प्रति॥

सागरः स्तिमित आस सानिलः केवलं द्वितयमेव जङ्गमम् ।
वीर–सावरकरस्य वाहिनी नित्यदक्षमथ तस्य मानसम् ॥
''कंसबन्धनगृहात् पलायितोऽर्भकश्च निशि देवकीसुतः ।
दैवतं निखिलराष्ट्रवादिनां श्रीशिवाजिरपि शत्रुबन्धनात् ॥
बन्धने न हि मया विपत्स्यतेऽहं करोमि न चिरात् पलायनम् ।''
'मोरिया' सततगामिनी दिनैर् मारसेलिसमवाप सप्तभिः ॥
वीचिविग्रहकरस्य सागरे प्राणहानिरपि मे वरं, न तु ।
न्यायनाट्यकृतशूलरोपणं स्यात् कदाचिदिति तेन चिन्तितम् ॥

(२) शब्दज्ञानम् । (३ तः २) (२)

(i) सन्धिविग्रहं कुरुत ।

प्राणहानिरपि - ........ + ........ ।

(ii) रेखाङ्कितनामस्थाने एतद् सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

<u>बन्धने</u> मया न विपत्स्यते ।

(iii) गद्यांशतः विरुद्धार्थकं शब्दं चिनुत ।

(१) स्थिरम् × ..........

(२) मित्रम् × .......... ।

(क) पद्यांशं पठित्वा अन्वयपूर्तिं कुरुत अथवा माध्यमभाषया सरलार्थं लिखत । (४)

| |
|---|
| पद्मे मूढजने ददासि विभवं विद्वत्सु किं मत्सरः?<br>नाहं मत्सरिणी, न चापि चपला नैवास्ति मूर्खे रतिः ।<br>मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयतां<br>विद्वान्सर्वजनेषु पूजिततमो मूर्खस्य नान्या गतिः ॥ |

SEAT NUMBER | | | | | | | |

अन्वय: - (भक्त: वदति) पद्मे, मूढजने ········· ददासि, ········· मत्सर: किम्?
(लक्ष्मी वदति), "अहं न ·········, न च अपि चपला, न एव (मम) ·········
रति: अस्ति। (अहं) ········· नितरां द्रविणं ·········, तत्कारणं श्रूयताम्। ·········
विद्वान् पूजिततम:, मूर्खस्य ········· गति: न।"

## तृतीय: विभाग: — गद्यम्। [ ९ ]

**( अवबोधनम्, शब्दज्ञानम्, पृथक्करणम्, स्पष्टीकरणम् )**

प्र. ३. ( अ ) गद्यांशं पठित्वा निर्दिष्टे: कृती कुरुत। ( ४ )

(१) अवबोधनम्। (३ त: २) (२)

(i) पूर्णवाक्येन उत्तरत।

राजा कीदृशौ अनुग्रहपरिहारौ वर्जयेत्?

(ii) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत।

निवृत्तपरिहारान् मित्रमिवानुगृह्णीयात्।

(iii) उचितं शब्दं चित्वा चतुष्कोणं पूरयत।

सस्यादिकं यथाकालं गृह्णाति स: - [ ]

करदेभ्य: कृतक्षेत्राणि प्रयच्छेत्। अकृतानि कर्तृभ्यो नादेयानि। अकृषताम् आच्छिद्य अन्येभ्य: प्रयच्छेत्। ग्रामभृतकवैदेहका वा कृषेयु:। धान्य-पशु-हिरण्यै: चैतान् अनुगृह्णीयात्। तान्यनु सुखेन दद्यु:। अनुग्रहपरिहारौ चैतेभ्य: कोषवृद्धिकरौ दद्यात्, कोषोपघातकौ वर्जयेत्। अल्पकोषो हि राजा पौरजानपदानेव ग्रसते। निवेशसमकालं यथागतकं वा परिहारं दद्यात्। निवृत्तपरिहारान् पितेवानुगृह्णीयात्।

सीताध्यक्ष: सर्वधान्य-पुष्प-फल-शाक-कन्दमूल-वाल्लिक्य-क्षौम-कार्पासबीजानि यथाकालं गृह्णीयात्। बहुहलपरिकृष्टायां भूमौ (बीजानि) वापयेत्। यथाकालं च सस्यादि जातं जातं प्रवेशयेत्। न क्षेत्रे स्थापयेत् किञ्चित् पलालमपि पण्डित:।

दुर्भिक्षे राजा बीजभक्तोपग्रहं कृत्वाऽनुग्रहं कुर्यात्, दुर्गसेतुकर्म वा भक्तानुग्रहेण, भक्तसंविभागं वा। उपहतान् पितेवानुगृह्णीयात्। बाल-वृद्ध-व्यसन्यनाथांश्च राजा बिभृयात्।

| 0 | 1 | 2 | 3 |
|---|---|---|---|

(२) शब्दज्ञानम्। (३ तः २) (२)

(i) गद्यांशतः विशेष्यं चित्वा लिखत।

(क) अल्पकोषः ............ (ख) बहुहलपरिकृष्टायां .........

(ii) सन्धिविग्रहं कुरुत।

तान्यनु ......... + ......... ।

(iii) गद्यांशतः पूर्वकालवाचक - धातुसाधित - अव्यये चित्वा लिखत।

........... ।, .......... ।

**अथवा**

(२) पृथक्करणम्। (२)

जालरेखाचित्रं पूरयत।




**(ब)** माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत। (२ तः १) (५)

(१) ऋतुमनुसृत्य प्रसाधनं करणीयम्।

(२) अपि भारतीयभाषास्थितानां शब्दानां निर्वचनं कर्तुं शक्यते?

## चतुर्थः विभागः — नाट्यकलशः। [१३]

**(अवबोधनम्, शब्दज्ञानम्, पृथक्करणम्, स्पष्टीकरणम्)**

**प्र. ४.** (अ) नाट्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (४)

(१) अवबोधनम्। (३ तः २) (२)

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

तापसीभ्यां राजा रक्षाकरण्डकग्रहणात् प्रतिषिद्धः, यतः - ..........

| 0 | 1 | 2 | 3 |
|---|---|---|---|

SEAT NUMBER

(क) रक्षाकरण्डकं कण्टकितम्।

(ख) अपराजिता ओषधिः सर्पः भूत्वा राजानं दशेत् इति तयोः मनसि भीतिः।

(ii) रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत।

इदं सिंहशावकविमर्दात् परिभ्रष्टम्।

(iii) पूर्णवाक्येन उत्तरं लिखत।

तापसी बालकाय क्रीडनकरूपेण किं यच्छति?

(प्रविश्य मृण्मयूरहस्ता)

प्रथमा - सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व।

बालः - (सदृष्टिक्षेपम्) कुत्र वा मम माता?

राजा - (आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या? सन्ति पुनर्नामधेयसादृश्यानि।

सर्वदमनः - रोचते मे एष भद्रमयूरः। (इति क्रीडनकमादत्ते।)

प्रथमा - (विलोक्य सोद्वेगम्) अहो, रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।

राजा - अलमलमावेगेन। नन्विदमस्य सिंहशावकविमर्दात् परिभ्रष्टम्। (इत्यादातुमिच्छति।)

उभे - मा खल्विदमवलम्ब्य। कथं, गृहीतमनेन! (इति विस्मयात् उरोनिहितहस्ते परस्परम् अवलोकयतः।)

राजा - किमर्थं प्रतिषिद्धाः स्मः?

प्रथमा - शृणोतु महाराजः। एषाऽपराजिता नामौषधिः भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति।

राजा - अथ गृह्णाति?

प्रथमा - ततस्तं सर्पो भूत्वा दशति।

0123

राजा - भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?

उभे - अनेकशः। (राजा सहर्षं बालं परिष्वजते।)

सर्वदमनः - मुञ्च माम्। मम खलु तातो दुष्यन्तः। न त्वम्।

राजा - (सस्मितम्) एष विवाद एव प्रत्याययति।

(२) शब्दज्ञानम्। (३ तः २) (२)

(i) विशेषणविशेष्ययोः मेलनं कुरुत।

| अ | आ |
|---|---|
| प्रत्यक्षीकृता | मारीचेन |
| भगवता | दत्ता |
| | विक्रिया |

(ii) नाट्यांशतः पूर्वकालवाचकधातुसाधित-अव्यये चित्वा लिखत।

.................. , ................

(iii) तृतीयाविभक्त्यन्तपदे नाट्यांशतः चित्वा लिखत।

.................. , ..................

**(ब) नाट्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** **(४)**

**(१) अवबोधनम्। (३ तः २)** (२)

(i) उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत।

यमदूतः गणिकायाः प्राणहरणार्थम् ............... ।

(अ) अशोककोटरे सर्पः भूत्वा तिष्ठति।

(ब) अशोककोटरे मधुमक्षिका भूत्वा तिष्ठति।

(ii) उचितं शब्दं चित्वा चतुष्कोणं पूरयत।

कालसर्पस्य निर्गमनस्थानम् - [ ]

(iii) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत।

परिव्राजकः वदति - 'अस्माभिः संन्यासिभिः शोकः करणीयः।'

(ततः प्रविशति यमदूतः)

1 · 2 3

SEAT NUMBER | | | | | | |

यमदूतः - (आत्मगतम्) यमदूतोऽहम्। क्षीणायुषां प्राणिनां प्राणान् हर्तुं यमेन प्रेषितः। उक्तः च 'गणिकायाः वसन्तसेनायाः प्राणान् अपहर' इति। इयं सा वसन्तसेना।

गणिका - मधुकरिके, पश्य, दर्शनीयः अशोककिसलयः। एनं गृह्णामि। (तथा करोति)

यमदूतः - अयं स कालः। यावत् सर्पो भूत्वा, अशोककोटरे स्थित्वा, दष्ट्वा विषवेगेण प्राणान् हरामि। (तथा करोति)

गणिका - हम्, केनापि दष्टाऽस्मि। (भूमौ पतति।)

सखी - अज्जुके, अयं सः अशोककोटरात् निर्गतः कालसर्पः। परित्रायतां परित्रायताम्।

शाण्डिल्यः - अविधा, भगवन्, परित्रायताम्। परित्यजति खलु प्राणान् एषा अज्जुका।

परिव्राजकः - वासांसि जीर्णानि यथा विहाय ....

शाण्डिल्यः - अलं तत्त्वज्ञानप्रवचनेन। शीघ्रं कोऽपि उपायः चिन्त्यताम्। हा हन्त, मृता खलु एषा। (रोदिति।)

परिव्राजकः - (विचिन्त्य) शाण्डिल्य, अलं रोदनेन। अस्माभिः संन्यासिभिः न शोकः करणीयः।

शाण्डिल्यः - आः अपेहि निःस्नेह! मन्ये, निष्फलं ते योगसामर्थ्यं यदि अस्याः शरीरं पुनः प्राणसञ्चारं कारयितुं न शक्नोषि।

परिव्राजकः - किम् आह। मम योगसामर्थ्यं निष्फलमिति। पश्य इदानीम्। (आत्मगतम्) अस्याः गणिकायाः शरीरे मम प्राणान् स्थापयामि। (मन्त्रं पठित्वा तथा करोति)

0123



P.T.O.

(२) पृथक्करणम्। (२)

क्रमेण योजयित्वा वाक्यानि पुनर्लिखत :

(अ) (१) सर्पदंशेन गणिकायाः मृत्युः।

(२) यमादेशेन यमदूतस्य उद्यानप्रवेशः।

(३) गणिकामृत्युकारणात् शाण्डिल्यस्य शोकः।

(४) यमदूतस्य सर्परूपधारणम्।

**(क)** माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत। (२ तः १) (५)

(१) अस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि।

(२) न च गुरुनियोगा विचारमर्हन्ति।

## पञ्चमः विभागः - साहित्यपरिचयः साहित्यविशेषः च। |८|

**प्रश्न ५.** उचित विकल्पं चित्वा वाक्यं पुनर्लिखत। (१० तः ८)

(१) भारतविद्या नाम ………… प्राचीनेतिहास-संस्कृतविषयिणी ज्ञानशाखा।

(सिंहलद्वीपस्य, कम्बोजद्वीपस्य, भारतदेशस्य)

(२) ………… सुवर्णकालः इति उच्यते।

(मौर्यकालः, कुशाणकालः, गुप्तकालः)

(३) मूर्तिविज्ञानशास्त्रे ………… मूर्तिप्रमाणं विशदीकुर्वन्ति।

(पुराणानि, वेदाः, वाङ्मयदर्शनम्)

(४) डॉ. वा. वि. मिराशी महोदयेन पुराभिलेखविद्यासाहाय्येन ………… कालनिर्णयः कृतः।

(अश्वघोषस्य, भवभूतेः, बाणस्य)

(५) प्राचीनकाले ब्राह्मी, खरोष्ठी, शारदा, ग्रन्थलिपिः इत्यादयः ………… प्रचलिताः।

(लिपिभेदाः, भाषाभेदाः, लिपिग्रन्थाः)

0123

SEAT NUMBER

(६) पुराभिलेखानां ········ प्रकारा: सन्ति।

(दश, त्रय:, पञ्च)

(७) दानपत्रं, राजाज्ञा, प्रशस्ति: इति ········ प्रकारा:।

(हस्तलिखितानां, नाणकानां, पुराभिलेखानां)

(८) ऋग्वेदे ········ सन्ति।

(संवादसूक्तानि, चित्रसूक्तानि, नृत्यसूक्तानि)

(९) भरतमुनिना ········ सह देवदानवसङ्गरात्मकं नाटकम् इन्द्रध्वजमहोत्सवे प्रस्तुतम्।

(स्वपुत्रै:, अप्सरोभि:, गन्धर्वै:)

(१०) नाट्यस्य ············ अङ्गानि सन्ति।

(सप्त, पञ्च, नव)

## षष्ठ: विभाग: - लेखनकौशलम्। [१६]

प्रश्न ६. अधोनिर्दिष्टे कृती कुरुत। (३ त: २) (८)

(१) मञ्जूषात: उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा चित्रपटवर्णनं पुनर्लिखत।

आधुनिककाले ········ मनांसि आकृष्टवान् मराठीचित्रपट: नाम सैराट इत्येव। सैराट इति मराठीशब्दस्य अर्थ: 'स्वैरम्', 'अनिर्बन्धम्' इति।

महाविद्यालये पठन्तौ युवतीयुवकौ ·········· अनुरक्तौ। किन्तु तयो: विवाह: जातिभेदकारणात् ········ न अनुमत:। तयो: परिवारयो: वित्तीयस्तरौ अपि भिन्नौ। अत: उभौ गृहाभ्यां पलायनं कृत्वा ········ प्रान्तं व्रजत:। उपजीविकार्थं सङ्घर्षं कृत्वा सुखेन जीवनं यापयतो: तयो: अपत्यलाभ: भवति। किन्तु मिथ्याप्रतिष्ठया कन्याया: ········

0 1 2 3

अत्रान्त्य उभयोः हत्यां कुर्वन्ति। ……… अपि अयं चित्रपटः भारते सर्वत्र लोकप्रियः जातः। आधुनिककाले अपि भारतदेशे जातिभेदः कियान् गहनः विनाशकः च इत्यस्य यथार्थं चित्रणं कृतम्। अद्यावधि ……… भारतीयभाषासु अस्य चित्रान्तरणं सञ्जातम्। जातिभेदः ……………… इति अस्य चित्रपटस्य सन्देशः। अस्य गीतानि अपि अतीव श्रवणीयानि।

(गृहजनैः, परिवारजनाः, शोकान्तः, परस्परम्, षट्सु, भारतीययुवकानां, दूरवर्तिनं, शोककारकः)

(२) निमन्त्रणपत्रिकायाः आधारेण संस्कृतभाषया वृत्तान्तलेखनं कुरुत। (८)

**निमन्त्रणम्**

॥ विद्या विनयेन शोभते ॥

**आम्बेडकर-महाविद्यालयः, परभणी**

आयोजयति

संस्कृतदिननिमित्तेन व्याख्यानम्

प्राचीननीतिशास्त्रेषु **लोकतन्त्रस्य तत्त्वानि**

व्याख्यात्री - श्रीमती सुनीता पटेल

(संस्कृतज्ञा, विधान-सभा-सदस्या)

प्रमुखातिथिः - डॉ. गोरखनाथः धडफळे

(निवृत्तः न्यायाधीशः, औरङ्गाबाद-न्यायालयः)

स्थलम् - रमाई-सभागृहम्, आंबेडकर महाविद्यालयः, परभणी।

समयः - प्रातः १०.०० तः १२.०० ।

दिनांक - १६ ऑगस्ट २०२२

* संयोजकाः *

**मधुरा काम्बळे**
संस्कृतविभागप्रमुखा
sanskritlove4@yahoo.com

**प्रीतेशः कुम्भारः**
छात्रप्रमुखः
९४××××××२३

**सुजयः महालमाने**
कार्यप्रमुखः
jay26@gmail.com

SEAT NUMBER | | | | | | |

३) अधोदत्तेषु एकं विषयम् अधिकृत्य संस्कृतभाषया ८-१० वाक्येषु निबन्धलेखनं कुरुत। (८)

(१) परोपकारः।

(२) महाराष्ट्रदेशः।

(३) भारतविद्या।

## सप्तमः विभागः — भाषाभ्यासः। |१२|

प्र. ७. अधोनिर्दिष्टाः कृतीः कुरुत। (५ तः ४)

**(अ)** नामतालिकां पूरयत। (८ तः ६) (३)

| क्र. | नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| १ | सखि | सखी | ---- | स्त्री. | संबोधनम् | |
| २ | अम्भसि | ---- | सकारान्तम् | ---- | सप्तमी | एकवचनम् |
| ३ | पितृभिः | पितृ | ऋकारान्तम् | ---- | ---- | बहुवचनम् |
| ४ | नामनी | ---- | अन्नन्तम् | नपुं. | प्रथमा | |

**(आ)** समासतालिकां पूरयत। (८ तः ६) (३)

| क्र. | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | प्रतिदिनम् | ----------। | अव्ययीभावः। |
| २. | स्तुतिकन्या | स्तुतिः एव कन्या। | ----------। |
| ३. | ---- | कुशः च लवः च। | इतरेतर द्वन्द्वः। |
| ४. | अकृष्या | ----------। | नञ् तत्पुरुषः। |
| ५. | गदार्तः | ----------। | तृतीया तत्पुरुषः। |
| ६. | पुस्तकस्था | पुस्तके तिष्ठति इति। | ----------। |
| ७. | विन्यस्तहस्तः | विन्यस्तौ हस्तौ येन सः। | ----------। |
| ८. | पञ्चवटी | ----------। | द्विगु समासः। |

0 | 1 | 2 | 3

(इ) मञ्जूषातः तद्धितान्त-कृदन्तान् चित्वा उचितस्तम्भे लिखत। (८ तः ६) (३)

| तद्धितान्ताः | कृदन्ताः |
|---|---|
| | |

(देशीयाः, प्रसाधनम्, सौभद्रः, वृत्तिः, क्षुद्रता, नाशः, शौचम्, प्रणन्ता)

(ई) समानार्थकशब्दं लिखत। (८ तः ६) (३)

(१) शरीरम् – ...................... ।

(२) वस्त्रम् – ...................... ।

(३) अटवी – ...................... ।

(४) वह्निः – ...................... ।

(५) मार्जारः – ...................... ।

(६) दर्पणः – ...................... ।

(७) पत्नी – ...................... ।

(८) पद्मा – ...................... ।

(उ) सूचनानुसारं परिवर्तनं कुरुत। (५ तः ३) (३)

(१) सरस्वती पुनः वदति।

(लङ् लकारे परिवर्तयत।)

(२) जनाः दोलोत्सवं वितन्वते।

(कर्तृपदं एकवचने परिवर्तयत।)

0 1 2 3

SEAT NUMBER

(३) भक्तव्रजः क्षेत्रं समागच्छति विठ्ठलं भजति च।

(पूर्वकालवाचक-धातुसाधित अव्ययं योजयत।)

(४) न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे।

(सति-सप्तमी रचनां निष्कासयत।)

(५) बाणकविना पटभेदाः निरूपिताः।

('बाणकविना' स्थाने 'बाणकविः' प्रयुज्य वाक्यं पुनर्लिखत।)

## अष्टमः विभागः - अपठितम्। [४]

प्रश्न ८. माध्यमभाषया अनुवादं कुरुत। (६ तः ४)

(१) नृपः निर्धनेभ्यः अन्नं ददाति।

(२) कृष्णः देवक्याः अष्टमः पुत्रः।

(३) तस्यै शारदायै नमः।

(४) असत्यं मा वद।

(५) त्वं कुतः आगतोऽसि?

(६) श्वः यात्रिणः तीर्थक्षेत्रं गमिष्यन्ति।

◆◆◆